**संस्कृत वार्ता:**

**दिनाङ्क : 15/10/2026**

**सायम□ 06:20**

**<u>आदौ मुख्यवार्ता:</u>**

· लद्दाख-क्षेत्रे विकासस्य नूतनः अभ्युदयः - प्रधानमन्त्रिणा नरेन्द्र-मोदिना कृतं त्रिशतोत्तरत्रिसहस्रकोटिरूप्यकाणां पञ्च-विकास-परियोजनानां राष्ट्राय समर्पणम्।

· एशियन-गेम्स स्पर्धासु अद्भुत-प्रदर्शनं कृतवद्भिः भारतीय-दलस्य क्रीडकैः सह प्रधानमन्त्रिणः नरेन्द्र-मोदिनः उत्साहवर्धकः संवादः।

· सर्वोच्च-न्यायालयस्य ऐतिहासिकः निर्णयः। धर्मान्तरितेभ्यः नागरिकेभ्यः वंचित-वर्ग-आरक्षण-लाभो निषिद्धः। मद्रास-उच्च-न्यायालयस्य निर्णयः शीर्ष-न्यायालयेन समर्थितः ।

· अमरीका-देशस्य इलिनॉय-राज्ये हिन्दू-मन्दिरस्य विध्वंस-षड्यन्त्र-वार्ताम् अधिकृत्य भारतेन प्रगाढा चिन्ता व्यक्ता। स्थानीय-प्रशासनम् समाहूय मन्दिराणां सुरक्षा-प्रबन्धाय दृढः आग्रहः च विहितः।

· लास्-वेगास्-नगरे विश्व-मल्ल-स्पर्धायाः ग्रीको-रोमन वर्गे भारतीय-मल्लः विश्वजीत-रामचन्द्र-मोरे रजत-पदकम् अवाप्य देशस्य नाम स्वर्णाक्षरैः अङ्कितवान्।

**<u>अथ वार्ता: विस्तरेण</u>**

**<u>पीएम-लद्दाखपरियोजना</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य दृश्याङ्कन-माध्यमेन केन्द्रशासित-प्रदेशाय लद्दाखाय प्रायः पञ्चाशदधिक-त्रिशतोत्तर-त्रिसहस्रकोटिरूप्यकाणां पञ्च-प्रमुखाः विकास-परियोजनाः राष्ट्राय समर्पिताः। एताभिः पञ्च-परियोजनाभिः अस्मिन् पर्वतीय-क्षेत्रे सम्पर्क-व्यवस्था सुदृढा भविष्यति, ऊर्जा-मूलभूत-संरचनासु परिष्कारः भविष्यति, सांस्कृतिक-न्यासस्य संरक्षणं संवर्धिष्यते अथ च जल-सुरक्षा सुदृढा विधास्यते।

लोकार्पितासु परियोजनासु लेह-नगरे कुशोक बकुला रिम्पोछे, विमानपत्तनस्य नूतनं यात्रि-प्रकोष्ठ-भवनम् , अष्टनवत्यधिक-द्विशतकिलोमीटर-दीर्घः निम्मू-पदुम-दारचा-राजमार्गः, नव-मेगावाट-क्षमतायाः हानु लघु-जलविद्युत्-परियोजना, षड्षष्टि-केवी दाह-हानू-खालत्सी-विद्युत-प्रसारण-पङ्क्तिः, सिन्धु-तटे भारतस्य प्रथमं शैल-चित्र-संरक्षण-उद्यानम् अथ च हिम-सरोवर-परियोजनायाः अन्तर्गतं चत्वारिंशत्-ग्रामेषु विकसितानि चत्वारिंशत् जल-निकाय-सरोवराणि सम्मिलितानि सन्ति। केन्द्रशासित-प्रदेशस्य सर्वेषु सप्त-जनपदेषु अस्य आभासीय-लोकार्पण-कार्यक्रमस्य आयोजनं कृतम्। लेह-नगरस्थे सिन्धु-तटे आयोजिते मुख्य-कार्यक्रमे लद्दाखस्य उप-राज्यपालः वी. के. सक्सेना, केन्द्रशासित-प्रशासनस्य वरिष्ठाधिकारिणः, सेनायाः उच्च-पदस्थाः अधिकारिणः, सामाजिक-राजनैतिक-प्रतिनिधयः अथ च विशाल-संख्यायां नागरिकाः उपस्थिताः आसन्।

**<u>प्रधानमन्त्री-एशियाईक्रीडा</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्यां षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य एशियाई-क्रीडा-स्पर्धासु भागं गृहीतवता भारतीय-क्रीडक-दलेन सह संवादः क्रियते।

जपान-देशस्य आइची-नागोया-नगरे सम्पन्नासु एशियाई-क्रीडासु भारतेन एकविंशति-स्वर्णपदकानि, सप्तविंशति-रजतपदकानि, अथ सप्तत्रिंशत्-कांस्य-पदकानि समेत्य आहत्य पञ्चाशीति-पदकानि विजित्य पदक-तालिकायां चतुर्थं स्थानं प्राप्तम्।

**<u>सर्वोच्चन्यायालयः</u>**

सर्वोच्च-न्यायालयेन व्यवस्था दत्ता यत् हिन्दु-धर्मात् इस्लाम-धर्मे अथवा अन्येषु धर्मेषु धर्मान्तरिताः व्यक्तयः वञ्चितवर्गस्य अन्तर्गतं आरक्षण-लाभानां कृते स्वतः अभ्यर्थनां कर्तुं न शक्नुवन्ति।मद्रास-उच्च-न्यायालयस्य निर्णयस्य विरुद्धं तमिलनाडु-सर्वकारस्य याचिकां निरस्य न्यायमूर्ति-प्रशान्त-कुमार-मिश्रस्य न्यायमूर्ति-श्री-चन्द्रशेखरस्य च पीठेन प्रतिपादितं यत् पूर्वतन-जातौ अनुभूतं सामाजिक-वञ्चनां धर्मान्तरणानन्तरं अग्रे नेतुं न शक्यते। न्यायालयेन स्पष्टीकृतं यत् हिन्दु-सिक्ख-बौद्ध-धर्मात् भिन्नम् अन्यं धर्मं धारयन् कोऽपि व्यक्तिः अनुसूचित-जाति-मान्यतां धारयितुं सर्वथा अयोग्यः भवति।

**<u>विराम</u>**

**संस्कृतवार्तायाः संस्करणमिदम इदानीम आकाशवाणीतः प्रसार्यते।**

**प्रोमो - सोशल मीडिया**

**विदेशमन्त्रालय-यूएस**

अमेरिका-देशस्य इलिनोय-राज्यस्य ऑरोरा-क्षेत्रे एकं हिन्दू-मन्दिरं लक्ष्यीकृत्य सामुहिक-गोलीकाण्ड-षड्यन्त्र-वृत्तान्तेषु भारतेन गभीरा चिन्ता व्यक्तीकृता। अमेरिकायां दुरापन्नस्यास्य प्रकरणस्य विषये वार्ताहराणां प्रश्नानां उत्तरं प्रददन् विदेश-मन्त्रालयस्य प्रवक्ता रणधीर-जैसवालः अवोचत् यत् षड्यन्त्रे हिन्दू-विरोधी वर्णभेदीयश्च स्वभावः, विशेषतः भारतीय-मूलस्य जनान् विरुध्य हिंसाः, चिन्तायुताः क्लेशकराश्च सन्ति। प्रवक्त्रा संसूचितं यत् नवदिल्ल्यां अमेरिका-देशस्य विधि-प्रवर्तन-प्राधिकारिभिः गृहीतस्य पदक्षेपस्य संज्ञानं स्वीकृतम्, यत्र संदिग्ध-अभियुक्तस्य निगडनम्, तस्योपरि अभियोग-पञ्जीकरणञ्च सम्मिलितम् अस्ति। तेन अग्रे प्रतिपादितं यत् इयं घटना अमेरिकायां वर्णभेदीय-शत्रुतां भारत-विरोधी-घृणां इतोऽपि वर्धयति।

**भाजपा-राहुलगांधी**

भाजपेति दलेन अद्य काङ्ग्रेस-दलस्य वरिष्ठ-नेतारं राहुल-गान्धिनं प्रति नवदेहल्याम् विरोध-प्रदर्शन-काले महिला-आरक्षि-अधिकारिणा सह अमर्यादित-व्यवहारस्य गम्भीरः आरोपो विहितः।

अद्य नवदेहल्यां वार्ताहर-सम्मेलनं सम्बोधयन् भाजपेति दलस्य राष्ट्रिय-प्रवक्त्रा गौरव-भाटिया इत्यनेन समाख्यातम् यत् काङ्ग्रेस-नेत्रा नार्याः सम्मानस्य गरिम्णः च अनादरः कृतः। श्रीभाटिया इत्यनेन एतदपि निगदितं यत् सर्वोच्चन्यायालयस्य प्राङ्गणे विरोध-प्रदर्शनस्य आयोजनं न्यायपालिकायाः उपरि भय-प्रदर्शनस्य कुत्सितः प्रयासः आसीत्।

भाजपा-प्रवक्त्रा समाहितं यत् सर्वोच्च-न्यायालयस्य प्राङ्गणे अस्य प्रकारस्य अनुचित-व्यवहार-विषये न्यायालयेन सूचना-पत्रं निर्गतम्, यस्मिन् काङ्ग्रेस-दलस्य व्यवहारस्य स्पष्टीकरणमपि समाहूतम्। तेन प्रोक्तं यत् यद्यपि विरोध-प्रदर्शनं संविधान-दत्तः मौलिक-अधिकारः अस्ति, तथापि संविधान-सीमाम् उल्लङ्घ्य यत्र-कुत्रापि अनियन्त्रित-उद्घोष-करणस्य अनुमतिः संविधानेन न प्रदीयते।

**सर्वोच्चन्यायालय-पीजी**

सर्वोच्चन्यायालयेन नीट-पीजी षड्विंशत्यधिक-द्विसहस्रतमायाः परीक्षायाः उत्तर-कुञ्जिकायां प्रत्युत्तर-प्रकटीकरण-प्रक्रियायां च अधिकाधिक-पारदर्शितायै समर्पितायाम् याचिकायां केन्द्र-सर्वकारस्य राष्ट्रिय-चिकित्सा-आयोगस्य प्रत्युत्तरं समाहूतम्। न्यायमूर्तेः पी.एस. नरसिंहस्य न्यायमूर्ति-आलोक-अराधे-महोदयस्य च पीठेन प्राधिकारिभ्यः सूचना निर्गमय्य इयं याचिका पूर्वं लम्बित-याचिकाभिः सह संयोजिता ।

याचिकाकर्तृभिः प्रत्येकस्मै अभ्यर्थिने प्रदर्शितानां प्रश्नानां, विकल्प-उत्तराणां, तैः अङ्कितानां प्रत्युत्तराणां अथ च प्रामाणिक-शुद्ध-उत्तराणां प्राप्तेः अधिकारः याचितः। याचिकायां प्रतिपादितं यत् वर्तमान-व्यवस्था अभ्यर्थिभ्यः स्व-मूल्याङ्कनस्य स्वतन्त्र-सत्यापनं कर्तुम् अवसरं नैव प्रकल्पयति।

अवधेयमिदं यत् नीट-पीजी परीक्षा विगत-अगस्त-मासस्य त्रिंशत्-दिनाङ्के आयोजिता आसीत्, अथ जयपुर-परीक्षा-केन्द्रे प्राविधिक-अवरोधेन प्रभावितानाम् अभ्यर्थिनां कृते सितम्बर-मासस्य पञ्चम-दिनाङ्के अनुपूरक-परीक्षा सम्पन्ना आसीत्।

**यूक्रेन-रूस**

युक्रेन-देशेन अद्य रूस-देशस्य एकस्मिन् प्रमुखे तैल-संशोधनागारे द्रोण-अस्त्रैः क्षेपणास्त्रैः च भीषणम् आक्रमणम् विहितम्। रूस-देशस्य रक्षा-मन्त्रालयेन निगदितं यत् अद्य प्रातःकाले एव युक्रेन-देशेन मास्को-नगरस्य दक्षिण-पूर्व-दिशि स्थिते 'रियाजान' मण्डलस्य तैल-संशोधनागारे विशालम् आक्रमणम् आयोजितम्।

मन्त्रालयेन समाख्यातम् यत् तस्य वायु-रक्षा-तन्त्रेण आक्रमणकारिणीनां चतसृणां युक्रेनी 'फ्लेमिङ्गो'-क्षेपणास्त्राणां तथा च एकोनसप्तति द्रोण-यन्त्राणां पातनं विहितम्, किन्तु द्रोण-खण्डानां विकिरणेन तैल-संशोधनागारे भीषणा अग्नि-ज्वाला प्राज्वलत्।

युक्रेनी-राष्ट्रपतेः वलोदिमिर-जेलेन्स्किनः उद्घोषणात् कतिपय-होराभ्यः अनन्तरम् एव एषः सैनिक-प्रहारः सम्पादितः। जेलेन्स्की इत्यनेन समाख्यातं यत् रूस-देशस्य अस्वीकारेण अल्पकालिकः ऊर्जा-अवसंरचना-सन्धिविरामः अधुना अवसानं प्राप्तवान्।

**सर्जियो गोर - ब्लूमबर्ग**

अमरीकी-राजदूतेन 'सर्जियो गोर इत्यनेन भारत-देशः अमरीकी-उद्यमेभ्यः अनुपमः विपणि-प्रदेशः' इति निगदितः। नवदेहल्यां 'ब्लूमबर्ग-मञ्चे' भाषमाणेन तेन प्रोक्तं यत् ए.आई.-सेमीकंडक्टर-क्षेत्रयोः भारत-अमरीका-सहभागिता उभयोः राष्ट्रयोः आर्थिक-सशक्तीकरणाय परस्परं लाभप्रदा भविष्यति। मोदि-सर्वकारस्य ए.आई.-प्रयासस्य च तेन महती प्रशंसा कृता।

**उपराष्ट्रपतिः सी. पी. राधाकृष्णन**

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् श्वः कर्णाटक-केरल-राज्ययोः प्रवासे यास्यति। स्वस्य अस्मिन् प्रवासे उपराष्ट्रपतिः कर्णाटकस्य कारवार-नगरे भारतीय-नौसेनायाः 'आई.एन.एस. समर्थक' इत्याख्यस्य युद्धपोतस्य नौसेना-प्रवेश-समारोहे मुख्य-अतिथि-रूपेण भागं ग्रहीष्यति। तदनन्तरम् अह्नि, श्रीराधाकृष्णन् केरलस्य कोझिकोड-नगरे आयोजितस्य 'नवरात्र-सर्गोत्सवः' इत्याख्यस्य सांस्कृतिक-महोत्सवस्य भव्यम् उद्घाटनं विधास्यति।

**<u>क्रीडा</u>**

अमेरिकायाः लॉस-वेगास-नगरे समायोजितायां अण्डर्-23 विश्व-कुश्ती-प्रतियोगितायां भारतीय-मल्लेन विश्वजित्-रामचन्द्र-मोरे इत्यनेन ग्रीको-रोमन-वर्गस्य अन्तिम-प्रतिस्पर्धायां रजत-पदकं विजित्य नूतनः इतिहासः रचितः।

**॥ इति वार्ता: ॥**